Title न्यायवाद टिप्पणम

Author कृष्णदासः

Extent ८ Age १६८६

Subject न्यायशास्त्रम् · सम्पूर्णम्

नं० १२८३-घ वैशेषिक

नञ्वादटिप्पनी (न्यायशास्त्रम्)

पत्राणि ८ (सम्पूर्णम्)

नं० १२८३-घ

कर्त्ता कृष्णदासः

लिपिकः जयदेवः

संवत १९८७

द्विकमारोपैव घंसप्रागभावौ बुध्येते इति तयोरपि संसर्गावच्छिन्नप्रतियोगिताकत्वमि
ति प्रांचः ॥ तत्रेति ॥ घटो नास्तीत्यादौ नञर्थस्य घटत्वादिकमेवानुयोगितावच्छेदकं । तदव
च्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबलसिद्धमित्यर्थः ॥ नचैवमयं पदार्थः पदार्थेनान्वेतीत्यादिन्याये
न घटत्वस्य पदार्थैकदेशतया तादृशान्वयो विरुद्ध इति वाच्यं । अभावघटयोरन्वये घ
टत्वावच्छिन्नप्रतियोगितायाः संसर्गत्वात् । तत्र घटत्वमवच्छिन्नत्वं प्रतियोगित्वं चेति सांप्र
दायिकाः ॥ विलक्षणप्रतियोगितेति नव्याः । एतेन पदार्थतावच्छेदकावच्छिन्नानुमित्यादि
कं व्याख्यातमिति । एतेनानुभवेन विशदयति । नीलेत्यादिना । व्यतिरेकमुखेनान्वयमा
ह इहेति । आद्यमत्यन्ताभावस्य पीतो घट इत्यन्योन्याभावस्य । अत्र च नीलघटान्याभावयोरन् १
यनीलघटत्वावच्छिन्नप्रतियोगिता पूर्ववत्संसर्गो बोध्यः ॥ उक्तेति ॥ तेन यादृशसमभिव्या
हारे प्रतियोगिनस्तादात्म्येनान्वयस्तत्रान्योन्याभावस्य । अत्र चात्यन्ताभावस्यान्वयो

प्र १

श्रीगणेशाय नमः ॥ संसर्गाभाव इति ॥ नन्वविभाजकीभूताभावत्वमेव प्रवृत्तिनिमित्त
मस्तु लाघवादिति वाच्यं । घटः पटो न घटो नास्तीत्यादौ भेदत्वादिनैव नानाभावस्यैव प्रवृ
त्तिनिमित्तत्वौचित्यात् । न चैवमपि अत्यंताभावत्वमेव प्रवृत्तिनिमित्तमिति वक्तुमुचि
तमिति [illegible] वाच्यं । एतन्मते संसर्गाभावत्वस्याखंडाभावमात्रवृत्तितया तस्यैव तदर्थकत्वा
त् । न च ध्वंसप्रागभावयोरपि संसर्गाभावत्वं संप्रदायसिद्धमिति वाच्यं । तयोः प्रतियोगिता
याः संसर्गविशेषानवच्छिन्नत्वात् । भवति हि संयोगसंबंधेन घटवति भूतलादौ सम
वायसंबंधेन तदभावबुद्धिरित्यत्यंताभावप्रतियोगितायाः संसर्गविशेषावच्छिन्नत्व
मिति । अन्योन्याभावस्य च तादात्म्यावच्छिन्नप्रतियोगिताकत्वं पुनरावश्यकमिति ॥ न च वा
स्तु घटः पटो नेत्यादौ भेदत्वप्रकारकतायाः आवश्यकत्वेन तत एव वैलक्षण्यसिद्धौ अत्यंता
त्मस्याप्रतियोगितावच्छिन्निरूपेलेत्याकुः । संयोगेन समवायेन वा भूतलादौ घटा

कपाले १

बोध्यः॥ ननु चैत्रो न पचतीत्यादावनुयोगिनिसप्तमीं विना कथं पाकत्वत्यभाव
बोध इत्यत आह॥ तेनेति॥ तथा च चैत्रेनुयोगिनि स्वतः समवायः संसर्गमर्या
दयाभासते अत एव स्वत्वाभावस्यापि स्वरूपमेव तथैवेति उभ्येसाधकपष्टं नः।
एतदेव विधिनिषेधाभ्यां दर्शयति। यथेति॥ अत्र च वैयाकरणमते कटीजिन्न
चैत्र इति विवादसंभवादाह। चैत्रस्येति॥ तत्र। चैत्रे। तथा। प्रकारत्वं॥ षष्ठ्या
देश्चैत्र इति॥ स्वत्वे चैत्रः प्रकारः निरूपितत्वं संबंधः तादृशस्वत्वं चाश्रय
तया धने प्रकार इति क्रमः स्वमतसिद्धः। येतु स्वामित्वं षष्ठ्यर्थः तत्र चाश्र
यतया चैत्रः प्रकारः तादृशस्वामित्वं च निरूपकत्वेन संबंधेन धने प्रकार इति
वदंति तन्मतं निषेधति। नत्विति॥ प्रसंगादिति॥ स्वामित्वस्य चैत्रवृत्तित्वे

2 नहि वृत्तिता नियामकसंबंधेन धनेतस्याभाव सत्त्वादिति भावः। ननु निरूपकत्वे
न संबंधेन तदभावो वाच्यः स च चैत्रीय धनेऽसिद्ध एवेत्यत आह। निरूपकत्वा
दिति॥ स्वत्वनि रूपकत्वस्य प्रतियोगितानवच्छेदकत्वे किं मानमित्यत आ
हादिजिति॥ अयं भावः। न खलु शाब्दनैव वस्तुसिद्धिः किंतु प्रमाणांतरसिद्धमर्थं
शाब्दो बोधयति· नहि निरूपकत्वसंबंधस्याभावप्रतियोगितावच्छेदकत्वं प्रत्य
क्षादिना व्यवस्थाप्यते येन तस्य शाब्दत्वं स्यादिति। न च नवन्मते पि स्वत्वे चैत्रनि
रूपितत्वस्य कुतः संबंधत्वं। अन्यथानुपपत्त्यैव तस्य संबंधत्वात्। तस्य कथं २
चिदप्यभावेनानन्वयादिति॥ न च्यास्तु स्वामित्वस्य प्रकारत्वे धनं चैत्रस्वामिद्र
त्येवान्वयबोधः स्यात् स चानुभवविरुद्ध इति स्फुट एव दोष इति प्राहुः॥ प्राचाम

नुयोगिनि सप्तम्यपेक्षास्वलमाह। यद्वेति॥ ननु तत्र सप्तम्यर्थस्यैवाभावो घटा
दौ भासते तत्कथं परमादाय प्रतियोग्यनुयोगिभाव इत्यत आह। अत्रैवेति॥ कदा
चिदिति। भूतले घटो नास्ति घटाभाव इति प्रथमकल्पे। भूतले घटो नास्तीत्यभाववान् घट इ
ति द्वितीयकल्पे। अस्मिन्कल्पे न त्र एव प्रथमान्तत्वं। तेन प्रथमान्तोपस्थापितवि
शेष्यकबोधजनननिर्वाहः। अत एवेति॥ यत एव कदाचिद् घटो नास्तीत्यभावबोधो गी
लत इति। पृथिव्यामिति। गंधे पृथिवीवृत्तित्वजले नास्तीत्यभावो भयविशेष्यक
त्वप्रतीतेरित्यर्थः। आधकल्पानुसारेण गंधः पृथिवीवृत्तिः जले गंधाभाव इति
भिन्नविशेष्यकत्वं स्यादिति भावः। यत्तु प्रसतोदाहरणे समानविशेष्यकत्वं प्र
कारान्तरेणानिर्वाह्यतीति तन्मतमुपन्यस्यति। सप्तम्यर्थेति। इत्थं च पृथिवीवृत्तिः

धोजलनिष्ठात्यंताभावप्रतियोगीत्वन्वयक्रमः। केचित्तु त्वस्वरसोद्भावनं तद्बी
3 जं उ घटवत्यपि भूतले व्या सज्यवृत्तिप्रतियोगिकाभावमादायेत्युं प्रयोगः स्यादि
ति। नञो क्रमे लौवतदवच्छिन्नप्रतियोगिताकत्वस्य संसर्गताविवक्षयातद्दु
द्धार इति वाच्यं। व्यतिक्रमे णतस्यान्वये तस्यासंसर्गत्वात्। अन्यथा घटान्नाव
वानित्यत्रापि तथा स्यादिति। सप्तम्यर्थस्यैवाभावो भासते इति नियममभ्युप
गच्छतां मतं आह। केचित्त्विति॥ सर्वत्र विशेष्ये॰ घटादौ। विशेषणस्य। अधिकर
णवृत्तित्वस्य। अत एवेति। यत एव घटस्य विशेष्यत्वमिति। वचनैक्य नियम ३
मइति। भूतले घटौ स्त इत्यत्र भूतवृत्ति विद्यमानताश्रयो द्वित्वावच्छिन्नौ घटौ।
न स्त इत्यत्र तु अतादृश विद्यमानताश्रयो द्वित्वावच्छिन्नौ घटाविति। ननु संबं

नीलघटइ
ति २

धांतरेणान्वितत्वाभावो वक्तव्यस्तत्राह। संबंधांतरेणेति। संबंधांतरं। एकार्थ
समवायादि। केचित्तु समवेतीत्याधाराद्युत्पन्नत्वं निर्वाहयंतीति। इदानीमन्यो
न्याभावबोधकस्थले दृष्टयति। यत्रवेति। ननु कर्मधारयस्थले समानविभ
क्तिकत्वाभावात्कथमिदं तंत्रमित्यत आह। विरुद्धेति॥ यद्यपि नीलं विपुष्यमित्या
दावसमासेपि श्रूयमाणसमानविभक्तिविरहात्तत्र कुत्राप्यसाधारणमेव
समानविभक्तिकत्वं वाच्यमिति तथापि नित्यसमासे लोहितशालिरित्यादौ
तत्प्रधानं। न वा [illegible] तविभक्तेः समानत्वं तत्तद्विभक्तिस्वत्वादिघटितं तच्चा
ननुगतमिति तदुपेक्ष्य विरुद्धविभक्त्यभाव [illegible] कूटं तंत्रत्वेनोचितमिति तदवतारे
णुपष्टंभकमाहुः। अत एवेति॥ यत एव समानविभक्तिकत्वं अभेदान्वये तं
त्रमत एव नैत्यर्थः। यजतिष्विति॥ यागेच्छितपदैः। येन ग्रामं हं [illegible] दिकाविशे

षं। अनुयाजो यागविशेषः। एकवाक्येति। अनुयाजान्न यजति षु ये यजा
२७ महे करणे विध्येक्यं। अनुयाजेषु ये यजामहे करणनिषेधे विधिद्वयमिति।
५ नन्वीदृश्यैकवाक्यत्वेऽन्यत्रापि विधिद्वयोच्छेदापत्तिरित्यत आह। येयजाम
हमित्यादेरिति। तथा चान्यथानुपपत्त्या तत्रैवं विधिद्वयं कल्प्यते प्रस्तुते नत्र ४
षु ये यजामहमित्यादेरनुषंगमहत्त्वौरवमितिभावः। आदिपदेन करोतीत्य
स्य परिग्रहः। इदं तु यथाश्रुतवितामण्यापादितं द्वैलिखितमिति तथैव लिखितं।
वस्तुतो वेदे नानुयाजेषु करोतीत्येव पाठः इति ये यजामहस्यैवानुषंगो बोध्यः।
अत्र च न नानेदं उपस्थाप्यते तत्र च प्रभेदेऽनुयाजस्य प्रतियोगित्वेनान्वयः
यजतिषु अनुयोगित्वेनान्वयो बोध्यः। ननु विशेषणविभक्तिः किमर्थमित्यत आ ४

नीलोघट इत्यादौ।

ह। विशेषणेति। ननु विशेषणे। विनष्टैः साधुत्वेधारीभूतविभक्त्यर्थान्तरामा
वाच्यकर्म विशेषणे। विशेष्ययोर्नामार्थयोरन्वय इत्यत आह। नामार्थयोरिति।
तथा चाभेदान्वये न तत्रमिति भावः। मतान्तरमाह। लाघवेनेति। तादात्म्यादि
रिक्तनामार्थान्वयबोधमपेक्ष्यान्वयबोधमात्रस्यैव लघुत्वमित्यर्थः। तथात्वे।
धारीभूतविभक्त्यर्थस्य तीव्रत्वे। ननु सुंदरो घट इत्यादावभेदः कस्यार्थ इत्य
६ए त आह। विशेषविभक्तिरिति। कर्मधारये व्यभिचारमुद्धरति। नीलोत्पलमिति।
राजपुरुष इत्यादौ व्यभिचारमभिप्रेत्याह। मते चेति। तत्रापि विभक्तिलोपः
नित्यसमासत्वं पारिभाषिकमित्यपि कश्चित्तु। अत्रापि। नानुयाजेष्वित्यादि।
बोध्यतामिति॥ एकवाक्यतादियुक्तेर्विच्छमप्यकुसलत्वादिति भावः॥ अत्र चानुना
नुयाजेष्वित्यादौ निषेधकत्वं निषेधस्य प्राप्तिपूर्वकत्वाद्घजतिष्वित्यनेन

तस्याः पि प्राप्तिरवश्यंभाव्या। निषेधेन च तद्बाधने उपजीव्यविरोध इति पर्यु
दास इति मतमुपन्यस्यति। यद्विति॥ विकल्पोऽनवकाशादिति। तथा च सामा
5 न्यविधेर्यजतीत्यादेरनुयाजभिन्नपरत्वमिति। तत्रापि। ब्राह्मणेभ्य इत्यादा
वपि। विकल्प इति। तथा च समानविभक्त्यादिकं यन्नियामकमुक्तं तन्नास्तीति
भावः। इदमेव दृष्टांतेन द्रढयति। नहि रवल्विति॥ महतो राज्ञ इति तु प्रतियोग्य
भावान्वययोस्तु स्पयोगद्धे मत्यस्फोरणाय। कथं त्वादिति। घ्यादिशब्दानां
द्विवचनांतत्वेनैव साधुत्वमिति तत्र तथा व्युत्पत्तिविरहः [illegible] अत इति भावः।
द्वितीयस्येति। कोऽपि न्याय्य न दातव्यमित्यस्य स्वार्थः। यच्च पिनानुयाजेष्वकरो
तीत्यादि पाठानुसारेण तथा तथापि तेषां मते न तादृशः पाठ इति पूर्वमेवो ५
क्तमिति। इच्छं वा [illegible] स्वयमेव स्फुटीकरिष्यति। नापीदमिदमित्यादिना॥ अत

एवेति। सामान्यविधौ निषेधावरुद्धेतरपरत्वं यत एवेत्यर्थः। नत्रैव पर्युदासं निषेध
त्ति। नहीति॥ अमावास्यायामित्यादेरमावास्यात्वस्य षष्ठिदंडात्मकतया रात्रौ श्राद्ध
मित्यादिना एकवाक्यत्वेन रात्रिभिन्नामावास्या लभ्यते। नातो रात्रिश्राद्धप्रसक्तिरि
त्यत आह। नखल्विति। तथा चामावास्यामित्यादौ क्रियांतरसत्वेन न तेन सममेक
वाक्यत्वमिति। इदमेवाह। नापीदमिति। विकल्पापत्तिरिति। निषेधेन सर्वथा तद्बु
द्धेः उपजीव्यविरोधश्च एवेति भावः। तदर्थत्वादिति॥ यद्यपि तात्पर्यानिर्वचनं निबं
धनकरणवारणस्य प्रयोजनं तं लौकिकेसंनवदपि वैदिकेन तथा वैदिकेतस्या
पि वैयर्थ्यं तुल्यत्वादिति। तथापुरुषप्रवृत्त्या निषेधविधिद्वैध्ये तदपि कल्प्यते इत्या
शयः। अत्रास्मन्मातुलचरणाः। रात्राविन्यादेन निषेधः भिन्नवाक्यतापत्तेः। न
च पर्युदासे रात्रौ श्राद्धं न कुर्वीत इत्यत्र कुर्वीतेति वैयर्थ्यं। रात्रिभिन्ने श्राद्धं कुर्वीतेति

रात्रिभेदाधिकारः शौचं वा कर्तृविशेषणं। इदं च कालविशेषणमित्यन्यदेतत्। अत एव पर्युदासे लक्षणेति प्रयादोषि इ नन्व: ल६०

6 वं रूपस्य पर्युदासस्य प्रकृते संभवात्। न चामावास्यायामित्यादौ रात्रिप्रसक्तिः
एतस्य मुविना कर्तव्यमित्यादिवदधिकारविधिरूपत्वात्। तथा च स्य यथा कर्मसामा
न्ये शौचमधिकारो लभ्यते तथा श्राद्धसामान्येपि घटत एव भिन्नं धर्मिणो विनाल
क्षणामनुपस्थितेः। नन्वेवं च नानुपस्थितभेदस्यामावास्यायामित्यादिनाश्रयत
यान्वये कथं लक्षणेति वाच्यं। एवमप्यष्टकाः कार्या इत्यादावनन्वयात्। न च तत्र प्र
कृतिवद्विकृतिरिति न्यायेन रात्रिभेदो लभ्यते। तथापि कुर्वीतेत्यादिवैयर्थ्यस्य दुरु
द्धरत्वात्। एवं च रात्रौ श्राद्धकरणे प्रकृते कर्माभाव एव। तस्य प्रतिपक्षियमाणामा ६
वास्याश्राद्धस्यैव काले क्रियमाणत्वादित्याहुः। नन्वेवं विकल्पखंडने विकल्पस्थ
नमेव दुर्लभमित्यत आह। एकविषयतयेति। तथा च यत्र विधिर्न्नरास्य सामा

२ ऋयते

न्यस्यान्यदधिकरणं तत्र न विकल्पः यत्र वैकधर्माक्रांत एव धर्मीलिकरण

करणं तत्रैवेति भावः। नवाचापि=प्रतिरात्रत्वाक्रांतव्य क्लिनेदमादयोभ

यसंनवः। अत्रग्रहणं अत्राग्रहणमित्यनध्यवसायात्। ननु विकल्पे षोड

शिग्रहणंमिष्टसाधनं नेष्टसाधनमिति विरोधैकधर्मान्वय इत्यत इत्यत=आह।

=प्रत्येति। मुत्पन्नस्येति। न जानातीत्यत्र ज्ञानाभाव इति। यस्यावयवः यस्या

च[illegible]यः एवंदृष्टः कपिनाऽग्रे संयुज्यते मूले नेत्यादौ अत्र विनाशमात्रोपि

तथा। =अतएव तेषां मोहः पापीयान्नान्नुपमर्दे घेतरोत्पत्तेरित्यत्रेतरोत्पत्त्यभाव

स्य हेतुत्वं लभ्यते। अन्यथा इतरोत्पत्तिहेतुत्वाभावे फलतासंगतेरिति।

ननु षोडशिग्रहणस्येष्टसाधनत्वं कथं तस्यांगत्वादित्यत आह। मुख्यफलेति।

ननु ग्रहणाभावे चेत्तथैवेष्टं तत्कथं ग्रहणे प्रवर्त्ततेत्यत =आह। ग्रहणविधानेर

घटो नास्तीत्यत्र हेर

येति । तस्मात् । अतिशायिता पूर्वात् । इयं च पंचमी हेतुत्वे । तथा चातिशायिता
पूर्वहेतुकमतिशायितं फलमित्यर्थः । ननु नञर्थस्याविनामार्थत्वे द्वारीभूत
विनञर्थं विना कथं साक्षादन्वयबोध इत्यत आह । निपातातिरिक्तेति । वा
वा दयो निपाता इत्यनेन नाम मात्रस्य निपातत्वमिति ॥ अत एवेति । निपातत्वं वि
हाय यतोऽयं नियम इत्यर्थः । चंद्र इव मुखमित्यत्र इव शब्देन सादृश्यमुप
स्थाप्यते तत्र सादृश्ये चंद्रस्य प्रतियोगित्वेनान्वयः । अघटमिति । अत्र तत्त्वेन स
मम घटस्याभेदेनान्वयो नञो भेदवत्परतां विना न निर्वहतीत्यर्थः । अत्र त
त्पुरुषस्योत्तरपदलिंगनियमेनाघटः एव भवितुमर्हतीति घटस्याभाव इत्यव्ययी ७
भावेऽनभ्युपगतसंदर्भः । अव्ययीभावश्चेति नपुंसकत्वापत्तिश्चेति यद्यपि तथापि
यत्र परस्परतील्यादिकमस्ति तस्यैवैकदेशो लिखित इति । येऽनिपातातिरिक्तत्वं

विशेषणेनमन्यंते तन्मतमुपन्यस्यति। केचित्विति। प्रतियोगित्वइतिप्राचीनम
तेन। विशेषणतानिष्ठस्यैवसंबंधत्वात् । स्वमते त्वाह। अनुयोगित्वेवेति। नन्वधि
करणत्वस्यप्रथमाविभक्त्यर्थत्वात्व्युत्पत्त्यानुशासनानुरोधेनस्तु। द्वितीयक्तौ
नसद्भावेति विरोधइत्यत आह। नञोवेति। ननुनपंचमीतत्रकथंपाकत्वति
भेदेनप्रतीयतेकथंवाभूतलेनघटइत्यत्रघटसंसर्गाभावइत्यतआह। विभ
क्त्यर्थेति। तेनविभक्त्यर्थस्यनान्योन्याभावइ। अत्रैवोदाहरणद्वयंनपश्यतीत्या च
दि। अनुयोगिसमानविभक्तिकार्थस्यात्रनसंसर्गाभावप्रतीतिः। तत्रोदाहरति ८
भूतलंनघटइति। अनुयोगिवाचकभूतलपदेनसमानविभक्तिकंयद्घटपदं
तस्ययोऽर्थस्तस्यैवान्यथइतिसारं॥ ॥श्रीः॥ इतिश्रीमन्कृष्णदासविरचितंनञ
वादटिप्पणं॥ ॥श्रीः॥ संवत् १६८७ वर्षे मोढज्ञातीयमु॰ ऊयदेवेन लिखितं॥

अनुयोगिनाऽ

रौ सं नाम्न गुणौ स्तथैव तदनु स्वाभाविकी स्वच्छता च संगा हृ । चेतांबुजं तूत्थ येयः
स्थवर्णैनयरस्यापरे । किंचातः परमस्तुतेः स्तुतिपदं यज्ञौ विनांजी वनत्वैर्वैन्नी
नपयेनयास्यासि पुनः कस्थांनिसे हुंदुमः ॥ १ ॥ असौ स्तुरतलंगजराणीनपुनरत्न
नौगमोऽभवत्तराणिमज्जनं पाथ्यकमेव भीतिं ङ्जः । विधाय हृदिनिर्भरं विपु
नचारुकं भधर्यंस्यचनद्ध नघनागमेघनरसस्य पारंजजः ॥ २ ॥ ननमसिनिरवलंबे
सीदतादीर्घिका संचदग्निमुखविसृष्टोत्तानसूचंद्रपुटेनाजलधरजलधाराद्गुरतस्ता
५ वदास्त्तांबुनिरपिमधुरस्तेनकृतम्यातकेन ॥ ३ ॥

नन्नवादहपनो

१६०